D.A.V. PUBLIC SCHOOL, THANE
(2021-2022)
PERIODIC TEST II
SUBJECT - SANSKRIT

Std.: VIII **Marks:40**
Date: 29 /09 /2021 **Time: 2hrs.**

निर्देशा: -

1. अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।
4. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
5. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया।
6. खण्डक्रम: अपि लेखनीय:।

खण्डः क (अपठित-अवबोधनम्) (4 अङ्काः)

प्रश्नः1). अधोलिखितं अनुच्छेदं पठित्वा प्रश्नान् उत्तरत -

भारतवर्षः कृषिप्रधानः देशः अस्ति। अत्र अनेके जनाः निवसन्ति। कृषकाः कृषिकार्यं कुर्वन्ति अन्नानि च उत्पादयन्ति। अन्नं विना जीवनं न भवति। कृषिकार्यं विना च कथम् अन्नस्य उत्पादनं भवेत् ? अतः ग्रामाणां कृषकाणां च अतीव महत्त्वम् अस्ति। कृषकाः अहोरात्रं कार्ये व्यस्ताः भवन्ति। केचित् ग्रामीणाः स्वगृहे स्थित्वा एव कार्यं कुर्वन्ति। यथा – लौहकारः लौहकार्यं करोति। कुम्भकारः घटं रचयति। सौचिकः वस्त्राणि सीव्यति। क्षुरकः केशकर्तनं करोति। वैद्यः जनानां स्वस्थ्यरक्षणं करोति। अधुना अपि अनेकेषु ग्रामेषु विद्युत् सुविधा न अस्ति। वर्षा अपि समये न भवति। जलस्य अभावे अपि कृषिः इच्छितं फलं न ददाति। वस्तुतः ग्राम्यजीवनं कठिनं भवति। परं ग्रामीणाः आनन्देन सर्वाणि कार्याणि कुर्वन्ति तथा अल्पेन एव सन्तुष्टाः भवन्ति।

I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) - **½x2=1**

(क) कुम्भकारः किं रचयति? **(ख)** किं विना जीवनं न भवति?

(ग) कः केशकर्तनं करोति?

II. पूर्णवाक्येन उत्तरत । (केवलं एकम्) - **1x1=1**

(क) के अहोरात्रं कार्ये व्यस्ताः भवन्ति? **(ख) के** स्वगृहे स्थित्वा एव कार्यं कुर्वन्ति?

III. निर्देशानुसारम् विकल्पेभ्यः उचितं उत्तरं चित्वा लिखत। (केवलं प्रश्नद्वयम्) - **1x2=2**

(क) 'निवसन्ति' इति क्रियापदस्य कर्तृपदं किम् ? **i).** अत्र **ii).** अनेके **iii).** जनाः

(ख) 'ग्रामीणाः' इति विशेष्यपदस्य विशेषणपदं लिखत | **i).** केचित् **ii).** इच्छितम् **iii).** अनेके

(ग) 'चिकित्सकः' इति पदस्य पर्यायपदं किं प्रयुक्तम् ? **i).** कृषकाः **ii).** वैद्यः **iii).** कुम्भकारः

खण्डः ख (रचनात्मक कार्यम्) (9 अङ्काः)

प्रश्नः2) भवती रमा। अध्ययनं प्रति मातरं आश्वासयितुं लिखितं पत्रं मञ्जूषायाः प्रदत्तपदैः पूरयित्वा पत्रं पुनः लिखत - **½ x6 =3**

परीक्षाभवनात्,
दिनाङ्कः - ... 09.2021

पूज्य मातृचरणाः,

सादरं **i)** .....।

अत्र कुशलं तत्रास्तु । आशासे भवती तथा पितृमहोदयः च **ii)** ..... स्तः। मातः ! अहं जानामि यत् भवती मम अर्धवार्षिक-परीक्षापरिणामकारणात् **iii)** ..... अस्ति। भवती चिन्तां न करोतु। प्रथमसत्रे तु अहं खेल-प्रतियोगितासु व्यस्ता आसम्। पठनाय तु समयः एव न प्राप्तः। परन्तु अधुना **iv)** .....

प्रतियोगिता: समाप्ता:। अद्य आरभ्य अहं केवलं पठने एव v)..... दास्यामि। अहं संकल्पं करोमि यत् वार्षिकपरीक्षायां भवताम् अनुकूल: एव परिणामं प्राप्स्यामि। कृपया vi)..... आशीर्वादं यच्छतु। शेषं सर्वं कुशलम् अस्ति।

पितृचरणयो: मम प्रणामा:।

भवत्या: पुत्री

रमा

मञ्जूषा – ध्यानं, प्रणामा:, सर्वा:, चिन्तिता, मह्यं, कुशलौ,

प्रश्न: 3). चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया त्रीणि वाक्यानि लिखत- 1x3=3



मञ्जूषा – उद्यानस्य, प्रसन्ना:, बाला:, कन्दुकेन, वृक्षा:, विशालगृहम्, माता, पिता , सुन्दरम्, घासम् ,

प्रश्न:4).अधोलिखितानां वाक्यानां संस्कृतभाषया अनुवादं कुरुत – (केवलं त्रीणि वाक्यानि) 1x3=3

(क) रमेश पढ़कर खेलता है। **(ख)** दस बंदर फल खाते हैं।

(ग) तुम सब आम खाओ। **(घ)** रमा ने पुस्तक पढ़ी।

खण्ड-ग (अनुप्रयुक्त-व्याकरणम्) (10 अङ्का:)

प्रश्न:5).अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं विच्छेदं वा कृत्वा पूर्णवाक्यं लिखत-(केवलं प्रश्नद्वयम्) ½x2=1

(क) सतां विभूतय: **पर + उपकाराय** भवन्ति। **(ख)** पाणिनि: **अष्ट + अध्यायी** ग्रन्थं लिखितवान्।।

(ग) रात्रौ आकाशे **सप्तर्षय:** भवन्ति। **(घ)** **साधूक्ति:** हितकारिणी भवति।

प्रश्न:6). अधोलिखितेषु प्रदत्तविकल्पेभ्य: उचितशब्दरूपं चित्वा रिक्तस्थानं पूरयित्वा पूर्णवाक्यं लिखत – ½x4=2
(केवलं प्रश्नचतुष्टयम्)

(क) रघुवंशम् इति ..... रचना अस्ति । **i).** कालिदासस्य **ii).** कालिदास: **iii).** कालिदासम्

(ख) भक्ता: ..... स्नानं कुर्वन्ति। **i).** गंगा **ii).** गंगायां **iii).** गंगायै

(ग) बालका: ..... परित: भ्रमन्ति । **i).** गिरिणा **ii).** गिरिषु **iii).** गिरिम्

(घ) अहं मम ..... मोदकं यच्छामि। **i).** मित्राणि **ii).** मित्राय **iii).** मित्रेण

(ङ) ..... भ्रमणाय हिमालयं गच्छन्ति। **i).** मुनय: **ii).** मुनीषु **iii).** मुनि:

प्रश्नः 7). अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रदत्तविकल्पेभ्यः प्रयुज्य पूर्णं वाक्यं लिखत – (केवलं प्रश्नद्वयम्) ½x2=1

(क) आम्रवृक्षे ……(25)…. फलानि सन्ति । i). पञ्चविंशतिः ii). पञ्चत्रिंशत् iii). पञ्चदश

(ख) सरोवरे ……(39)…. वर्तकाः तरन्ति। i). नवदश ii). नवपञ्चाशत् iii). नवत्रिंशत्

(ग) ……(18)…… पुराणानि सन्ति। i). अष्टादश ii). अष्ट iii). अष्टात्रिंशत्

(घ) ……(3)……. बालकाः गृहे खेलन्ति। i). त्रयोदश ii). त्रीणि iii). त्रयः

प्रश्नः 8). अधोलिखितवाक्येषु रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत- (केवलं प्रश्नद्वयम्) 1x2=2

(क) **रमायै** स्वस्ति। । (ख) शिशुः **चमसेन** विना खादति ।

(ग) **कुक्कुराय** खेलनं रोचते । (घ) **कोलाहलेन** अलम्।

(ङ) **द्वारम्** उभयतः सैनिकौ स्तः।

प्रश्नः 9). अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा रिक्तस्थानानि पूरयित्वा पूर्णवाक्यं लिखत – (केवलं प्रश्नचतुष्टयम्) ½x4=2

(क) मनुष्यः सदा दुर्गुणान् …….। i). त्यजेत् ii). त्यजेः iii). त्यजेयम्

(ख) चटका नवीनगृहस्य निर्माणं …….। i). करिष्यामि ii). करिष्यसि iii). करिष्यति

(ग) महर्षिः तस्मै यात्रिणे फलानि …….। i). अयच्छत् ii). अयच्छन् iii). अयच्छः

(घ) जनाः प्रतिदिनं व्यायामं …….। i). कुरुत ii). कुर्वन्तु iii). कुरु

(ङ) सरोवरे जलचराः आनन्देन …….। i). वसतः ii). वसन्ति iii). सन्ति

प्रश्नः10). अधोलिखिततेषु वाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णवाक्यं लिखत - ½x2=1 (केवलं प्रश्नद्वयम्)

(क) रमेशः पितरं **नम् + त्त्वा** शालां गच्छति। (ख) बालः भोजनं **खादितवान्।**

(ग) राधा अत्र **आगत्य** कथां वदति। (घ) मृगाः जलं **पा + तुमुन्** सरोवरं गच्छन्ति।

प्रश्नः 11).अधोलिखिततेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं पृथक् कृत्वा संयोज्य वा लिखत -(केवलं प्रश्नद्वयम्)½x2=1

(क) शिशुः मातरम् **अनुकरोति**। (ख) बालिकाः पाठम् **अधि+गच्छन्ति**।

(ग) मनुष्यः **दुर् + वचनं** न वदेत्।

खण्ड- घ (पठित अवबोधनम्) - (17 अङ्काः)

प्रश्नः12).अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तरराणि लिखत । - (3)

एकदा सः काशीनगरे गङ्गायाः तटे एकस्मिन् कुटीरे शिष्यैः सह अतिष्ठत् | तत्र समीपम् एव एकः यात्री अपि अतिष्ठत्। ईर्ष्यया सः यात्री महर्षेः कुटीरम् आगत्य अकारणम् एव महर्षिं दुर्वचनानि वदति स्म | जितेन्द्रियः महर्षिः सर्वं श्रुत्वा शान्तचित्तेन एव तिष्ठति स्म | सः कदापि न प्रत्युदतरत् | शिष्याः क्रुद्धाः अभवन् | महर्षिः तान् 'चिन्तां मा कुरुत, तूष्णीम् भवत' इति अकथयत् | महर्षिः कथयति स्म यत् सः स्वयम् एव एकस्मिन् दिने सरलः भविष्यति |

I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) - ½x2=1

(क) के क्रुद्धाः अभवन् ? **(ख)** तत्र समीपम् एव कः अतिष्ठत्? **(ग)** कः महर्षिं दुर्वचनानि वदति स्म?

II. पूर्णवाक्येन उत्तरत। (केवलं एकम्) - 1x1=1

(क) जितेन्द्रियः महर्षिः सर्वं श्रुत्वा किं करोति स्म? **(ख)** महर्षिः किं कथयति स्म?

III. निर्देशानुसारम् उत्तरत। (केवलं एकम्) - 1x1=1

(क) 'जितेन्द्रियः महर्षिः' अनयोः पदयोः विशेषणपदं किम् अस्ति ?

(ख) 'आकर्ण्य' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम् ?

प्रश्नः13). निम्नलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत । - (3)

पिबन्ति नद्यः स्वयमेव नाम्भः स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः परोपकाराय सतां विभूतयः॥

I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) - ½x2=1

(क) काः अम्भः न पिबन्ति ? **(ख)** वृक्षाः किं खादन्ति ? **(ग)** के सस्यं न अदन्ति ?

II. पूर्णवाक्येन उत्तरत। (केवलं एकम्) - 1x1=1

(क) कस्मै सतां विभूतयः भवन्ति? **(ख)** नद्यः स्वयमेव किं न पिबन्ति ?

III. निर्देशानुसारम् उत्तरत। (केवलं एकम्) - 1x1=1

(क) 'खादन्ति' इति क्रियापदस्य कर्तृपदं श्लोके किम् प्रयुक्तम् ?

(ख) 'स्वयं न पिबन्ति'। अस्मिन् वाक्ये अव्ययपदं किम् अस्ति?

प्रश्नः14). अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत । - (3)

सुमेधा – किं विज्ञानसंबन्धिनः मानवजीवनोपयोगिनः ग्रन्थाः अपि संस्कृते सन्ति |

विवेकः – आम् | आयुर्वेदः, धनुर्वेदः, अर्थशास्त्रम्, कृषिविज्ञानम्, वास्तुशास्त्रम्, दर्शन-शास्त्रम्, व्याकरणशास्त्रम्, वृक्षायुर्वेदः, विमानविज्ञानं च एते विषयाः संस्कृते लिखिताः सन्ति |

प्रणवः – व्याकरणस्य प्रसिद्धः ग्रन्थः कः अस्ति कः च तस्य रचयिता ?

प्रज्ञा – 'अष्टाध्यायी' इति व्याकरणस्य प्रसिद्धः ग्रन्थः अस्ति | पाणिनिः च तस्य प्रणेता आसीत् |

आचार्यः – साधु, युष्माभिः अतीव मनोरञ्जिका ज्ञानवर्धिनी च इयं प्रश्नोत्तरी आयोजिता | अनया खलु संस्कृतस्य सामान्यः परिचयः प्राप्यते | संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति | अस्माकं संस्कृतेः सभ्यतायाः च मूलम् अस्याम् एव निहितम् अस्ति |

सर्वे छात्राः – वयम् एतां मधुरां भाषां सदैव रक्षिष्यामः |

I. एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) - ½x2=1

(क) 'अष्टाध्यायी' इति कस्य प्रसिद्धः ग्रन्थः अस्ति? **(ख)** विश्वस्य प्राचीनतमा भाषा का अस्ति?

(ग) प्रश्नोत्तर्या कस्य सामान्यः परिचयः प्राप्यते?

II. पूर्णवाक्येन उत्तरत। (केवलं एकम्) - **1x1=1**

(क) वयम् कां सदैव रक्षिष्यामः ? **(ख)** विज्ञानसंबन्धिनः मानवजीवनोपयोगिनः ग्रन्थाः के सन्ति ?

(ग) अस्माकं संस्कृतेः सभ्यतायाः च मूलम् कस्याम् निहितम् अस्ति ?

III. निर्देशानुसारम् उत्तरत। (केवलं एकम्) - **1x1=1**

(क) 'प्राचीनतमा भाषा' अनयोः पदयोः विशेषणपदं किम् अस्ति ?

(ख) 'वयं सदैव रक्षिष्यामः'। अस्मिन् वाक्ये **वयं** इति कर्तृपदस्य क्रियापदं किम् प्रयुक्तम्?

प्रश्नः 15). अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत - **1x3=3**
(केवलं प्रश्नद्वयम्)

(क) **दुर्वचनानि** श्रुत्वा अपि महर्षिः तूष्णीम् अतिष्ठत्। **(ख)** कालिदासेन **त्रीणि** नाटकानि रचितानि।

(ग) **दानेन** हीनाः मनुष्याः न शोभन्ते। **(घ)** उत्तमाः **मानम्** इच्छन्ति।

(ङ) **चटकायाः** गृहम् अपि नष्टम् अभवत्।

प्रश्नः 16) अधोलिखितं श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत - **½x2=1**

अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥

अन्वयः - 1)..... धनम् इच्छन्ति, मध्यमाः धनं मानं च इच्छन्ति। उत्तमाः मानम् इच्छन्ति, मानः हि महतां 2).....(भवति)।

प्रश्नः 17). अधोलिखितानि वाक्यानि कथाक्रमानुसारं लिखन्तु। **½x4=2**

(क) तौ एकस्मिन् वृक्षे निर्मितं एकं सुन्दरं गृहम् अपश्यताम्।

(ख) काकः चटका च द्वे मित्रे स्तः।

(ग) काकः मृत्तिकया सुन्दरं गृहं निर्मितवान्।

(घ) अधुना आवाम् अपि एतादृशं सुन्दरं गृहं रचयिष्यावः।

प्रश्नः 18). अधोलिखितानां पदानाम् शुद्धम् अर्थं मञ्जूषातः चित्वा समक्षं लिखत । (केवलं प्रश्नचतुष्टयम्) ½x4=2

(क) निरामयाः .....

(ख) विश्वे .....

(ग) आदिमः .....

(घ) मृगाः .....

(ङ) रचितम् .....

लिखितम्
संसारे
रोगरहिताः
प्रथमः
पशवः

॥ इति ॥